आह्निक

क्र. नं. ११८

प्रयोग ५

संस्कृत

॥ पुरश्चरण दीपिका ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

पुरश्चरणदीपिका

॥ अथ पुरश्चरणदीपिका प्रारभ्यते ॥

पु॰दी॰ श्रीगणेशायनमः श्रीदक्षिणामूर्तिगुरुभ्योनमः कामेश्वरपदद्वंद्वंनिधाय हृदिसुंदरं काशीनाथःप्रतनुतेपुर
१ श्चरणदीपिकां तत्रादौगुरुशिष्ययोःपरीक्षा प्रोच्यतेमया गुरुशिष्यावुभौमोहादपरीक्ष्यपरस्परं उपदेशंदद
त्गृह्णन्प्राप्नुयात्तांपिशाचतां अज्ञस्त्वियोपदेशंतु योगृह्णातिददातिच भुज्येतेतावुभौघोरान्नरकानेकविंश
तिं अनर्हेमंत्रविज्ञानंनतिष्ठतिकदाचन तस्मात्परीक्ष्यवक्तव्यंअन्यथानिःफलंभवेत् यःस्नेहभयलोभा
धैरयोग्यंयदिदीक्षयेत् देवताशापमाप्नोतिकृतंचनिष्फलंभवेत् ज्ञानेनक्रिययावापिगुरुःशिष्यंपरीक्षयेत
संवत्सरंतदर्धंवातदर्धंवाप्रयत्नतः शिष्योपिलक्षणैरेतैःकुर्याद्गुरुपरीक्षणं आनंदाद्यैर्जपैःस्तोत्रैर्ध्यानहो
मार्चनादिषु ज्ञानोपदेशसामर्थ्यंमंत्रशुद्धिमयीश्वरी बोधकत्वंचविज्ञायशिष्योभूयान्नचान्यथा कुलार्णवे
श्रीगुरुःपरमेशानि शुद्धवेषोमनोहरः सर्वलक्षणसंपन्नःसर्वावयवशोभितः अग्रगण्योगभीरश्चपात्रापात्र
विशेषवित् शिवविष्णुःसमःसाधुर्नचदर्शनदूषकः नित्येनैमित्तिकेकाम्येरतःकर्मण्यनिंदिते यदृच्छाला राम
भसंतुष्टोगुणदोषविभेदकः इत्यादिलक्षणोपेतःश्रीगुरुःकथितःप्रिये अत्रिनेत्रःशिवःसाक्षाद्चतुर्बाहु १
रच्युतः अचतुर्वदनोब्रह्माश्रीगुरुःकथितःप्रिये निंद्यगुरुमाहक्रियासारे श्वित्रीचैवगलत्कुष्टीनेत्ररोगी

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai "

च वामनः कुनखी श्यावदंतश्च स्त्रीजितो ऽधिकांगकः हीनांगः कपटी रोगी बह्वाशी बहुजल्पकः एतैर्दोषैर्वि
हीनो यः सगुरुः शिष्यसंमतः आगमे गुरुर्गृहस्थ एवैको न कदाचिन्नयतिर्गुरुः केवलकामीपरोयं नियमः
तथा च सूतसंहितायां उत्तमः पंचधा प्रोक्तो गुरुर्ब्रह्मसुवेदिभिः ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः
अतिवर्णाश्रमी चेति क्रमात् श्रेष्ठो विचक्षणः ज्ञानार्णवे निंदितस्तु पितुर्मंत्रस्तथा मातामहस्य च सोदरस्य
कनिष्ठस्य वैरिपक्षाश्रितस्य च ननु स्त्रीदत्तोस्य मंत्र लब्धे च सिद्धादीन्नैव शोधयेत् इत्यनेन स्त्रीणामपि आ
चार्यत्वं प्राप्तं सत्यं किंतु स्वप्नवदेव अज्ञानात् स्त्रीतः प्राप्तस्तद्विषयमिदं वचः स्त्रीशूद्राणां साक्षात् आचार्य
त्वनिषेधात् तथा चोक्तं स्त्रियः शूद्रादयश्चापि बोधयेयुर्हिताहितं यथार्हं माननीयाश्च नार्हंत्याचार्यतां
क्वचित् शूद्रान्नं शूद्रसंपर्कः शूद्रेणैव सहासनं शूद्रात् ज्ञानागमः कश्चिज्ज्वलंतमपि पातयेत् सूतसंहिता
यामपि शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचनेति शिवः योग्यमाद्यं गुरुं त्यक्त्वा शिष्यः शूद्रं क्रियाविदं
गुरुं समाश्रयेदन्यं यः प्रयाति स दुर्गतिं इति गुरुपरीक्षा नारदतंत्रे नास्तिकान् भिन्नमर्यादान् कृतघ्नान्वेद
निंदकान् मंत्राक्षरोपदेशे तु दूरतः परिवर्जयेत् सनत्कुमारश्च नदेयमर्थलुब्धाय पिशुनायास्थिराय च

पुं॰दी॰ भक्तिश्रद्धाविहीनाय शुश्रूषाविमुखाय च अर्णवे दासस्य शिवभक्तस्य हितप्रियकरस्य च शूद्रस्यापि प्रदात
२ व्यं न मंत्रं प्रणवं विना प्रणवेन विना मंत्रः शूद्राणां प्रसाधकः प्रणवेन समायुक्तस्तयोर्द्वेविषोपमः आ
गमेपि स्वाहाप्रणवसंयुक्तं मंत्रं शूद्रे ददन्द्विजः शूद्रःश्चंडालतामेति विप्रः शूद्रत्वमेव हि अर्णवे अमा
त्यदोषो राजानं भार्यादोषः पतिं यथा तथा शिष्यकृतो दोषो गुरुं प्राप्नोत्यसंशयं तस्माच्छिष्यं गुरुर्नित्यं परी
क्ष्यैव परिग्रहेत् ॥ ॥ इति पुरश्चरणदीपिकायां गुरुशिष्यपरीक्षाख्यः प्रथमः प्रकाशः ॥ ॥ ॥ श्रीदक्षिणामूर्ति
गुरुभ्यो नमः अथ दीक्षाविधिः तत्रादौ मासनिर्णयः वैशाखे श्रावणे वापि आश्विने कार्तिके तथा फाल्गुने
मार्गशीर्षे वा कुर्यान्मंत्रस्य दीक्षणं सिद्धांतशेखरे शारत्कालेचवैशाखे दीक्षा श्रेष्ठफलप्रदा फाल्गुने मार्ग
शीर्षे च ज्येष्ठे दीक्षा तु मध्यमा आषाढे श्रावणे माघे कनिष्ठासद्भिराहृता निंदितश्चापि मासस्तु पौषो भाद्रपद
स्तथा निंदितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा इति मासनिर्णयः अथ तिथिनिर्णयः पूर्णिमा पंचमी चैव राम
द्वितीया सप्तमी तथा त्रयोदशी च दशमी प्रशस्ताः सर्वकर्मदाः संग्रहे द्वितीया पंचमी वापि षष्ठी चापि वि २
शेषतः द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा कुत्रचिन्निषिद्धत्वात् षष्ठीत्रयोदश्योर्मध्यमत्वं ग्रंथां

तरे षष्ठीभाद्रपदे मासि इषे कृष्णत्रयोदशी कार्तिके नवमी शुक्ला श्रावणे कृष्णपंचमी एतानि देवपर्वाणि ती
र्थकोटिफलानि च कृष्णाष्टम्यां चतुर्दश्यां पंचपर्वदिने तथा ग्रहणादौ व्यतीपाते परिवेषेंदुसूर्ययोः नवारमा
स दोषो रति ग्रहणे सूर्यचंद्रयोः ग्रहणे देवदेवेशि कालः सप्तदिनावधि इतितिथिनिर्णयः अथनक्षत्रनिर्ण
यः अश्विनीरोहिणीस्वातीविशाखाहस्तभेषु च ज्येष्ठोत्तरात्रयेष्वेव कुर्यान्मंत्राभिषेचनं श्रवणार्द्राधनि
ष्ठाचपुष्यः शतभिषस्तथा दीक्षानक्षत्रजातानि स्युः तंत्रार्थकोविदाः इतिनक्षत्रनिर्णयः अथवारनि
र्णयः रवौ गुरौ विधौ दीक्षा कर्त्तव्या बुधशुक्रयोः मैत्रारंभे रवौ शुक्रे बुधे जीवे विशेषतः शनौ मृत्युः क्षयं
भौमे सोमे सर्वं च निःफलम् इति वचनात् सोमस्य मध्यमत्वं इतिवारनिर्णयः अथदीक्षाकालनिर्णयः
गुरुशुक्रोदये शुद्धे लग्ने सद्द्वारशोधिते चंद्रतारानुकूले च ग्रहणे चंद्रसूर्ययो दिक्षाविधेयामंत्रज्ञैः पुरुषा
र्थप्रसिद्धये नमासतिथिवारादिशोधनं सूर्यपर्वणि ददतीष्टं च गृह्णीयात्तस्मिन्काले गुरोर्नरः सिद्धि
र्भवति मंत्रस्य विनाभ्यासेन कामतः प्रबुद्धे वेलसंयुक्ते शुक्रे देवगुरौ तथा शुक्लपक्षे च कृष्णे वा दीक्षास
र्वशुभावहा कालोत्तरे मुक्तिकामैः कृष्णपक्षे भूतिकामैः सिते सदा संहितायां मेषकर्कटकन्यासु

तुलायांवृश्चिकेतथा कुंभेचमकरेचैवदीक्षासर्वशुभावहा रुद्रयामले सतीर्थेर्कविधुग्रासेतंतुदमनपर्वणि मं
त्रदीक्षांप्रकुर्वाणोमासर्क्षादीन्नशोधयेत् चैत्रेदमनकींपूजां कृत्वादीक्षांसमाचरेत् अष्टमीद्वादशीभूताचतुर्थीरि
विसप्तमी श्रावणेतंतुपूजांच कृत्वासंस्कारमाचरेत् आगमेच सतीर्थेर्कविधुग्रासेपुण्यारण्येवनेषुच पुण्य
क्षेत्रेकुरुक्षेत्रेदेवीपीठचतुष्टये प्रयागेश्रीगिरौकाश्यां कालाकालंन्नशोधयेत् तत्वसारसंहितायामपि ति
थिंविनापिदीक्षायांविशिष्टावत्सरंशृणु दुर्लभेसद्गुरूणांचसकृत्संगउपस्थिते तदनुज्ञायदालब्ध्वासदीक्षा
वत्सरोमहान् ग्रामेवायदिवारण्ये क्षेत्रेवायदिवानिशि आगच्छतिगुरुर्दैवात् यदादीक्षातदाभवेत् सुसु
सुंप्रतिनकालनियमः निंद्यान्यपिचपर्वाणिप्रशस्तानिविमुक्तये प्रतिप्रसववचनात् वैशंपायनसंहिता
यां संध्यागर्जितनिर्घोषभूकंपोल्कानि पातने एतानन्यांश्चदिवसान्मृत्यूक्तांचपरित्यजेत् इतिकामि
विषयं तदेवलग्नमितिसामान्यदीक्षाकालः अन्यत्र त्रिरात्रमेवोपवसेत् आदितःसर्वकर्मणां त्रीणिन
क्तानिवाकुर्यात् ततःकर्मसमारभेदितिच गायत्रीकल्पे इतिदीक्षाकालनिर्णयः अथदीक्षानिर्णयः
अथदीक्षांप्रवक्ष्यामिसंक्षिप्तांगुरुसंमतां मुहूर्तेसर्वतोभद्रे नवकुंभंविधायच सोदकंगंधपुष्पाभ्यांअ



Joint project of the Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

र्चितवस्त्रसंयुतं सर्वौषधीपंचरत्नपंचपल्लवसंयुतं ततोदेवार्चनंकृत्वा हुनेदष्टोत्तरंशतं शिष्यंस्वलंकृतंवे
घासुपाग्निमुपवेशयेत् मंत्रितप्रोक्षिणीतोयैः सप्तकुंभजलैस्तथा मूलमंत्रेणाष्टशतं मंत्रितैरभिषेचयेत्
अथसंपादयेन्मंत्रंहस्तंशिरसिधारयेत् समोस्त्विस्मतो दद्यादथशिष्योर्चयेद्गुरुं शातकुंभंसुवर्णकुंभंअभाप्य
शक्तः कश्चिच्चेद्कुंभमभ्यर्च्य साक्षतं तदंबुनाभिषिंच्याथतारमूलेनकेकरं निधायाथजपेत्कर्णे उपदेशो
त्वयंविधिः उपदेशसुधायांतु चंद्रसूर्यग्रहेचैवसिद्धिक्षेत्रेशिवालये मंत्रमात्रप्रकथनंउपदेशः सउच्य
ते इतिपंचरत्नानि मुक्ता १ विद्रुम २ माणिक्य ३ पुष्पराग ४ इंद्रनीलमणिः ५ इतिपंचपल्लवा
स्तु अशोक १ आम्र २ पिप्पल ३ वट ४ बकुल ५ इतिसर्वौषधयः मुरमांसिवचाकुष्ठंशैले
यंरजनीद्वयं चंपकंभद्रमुस्तंचसर्वौषधिगणःस्मृतः रजनीहरिद्रा मंत्रग्रहणानंतरंशिष्यः अष्टोत्तर
शतंशिष्यप्रजपेद्गुरुणोदितं अष्टाविंशतिवारंवास्यष्टकृत्वो थवाजपेत् ततः दक्षिणाआत्मशक्त्या
दद्यात् तत् आवश्यकमितिवदंति नारदीये आचार्याद्नभिप्राप्तमंत्रश्चादत्तदक्षिणः अभ्यस्तोपि
सदामंत्रःश्रेयसेनावकल्पते दीक्षाप्रयोगस्तुमत्कृतदीक्षापद्धतौद्रष्टव्यः इतिदीक्षानिर्णयः शिवः

"Joint project of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai."

अदीक्षिताये कुर्वंति जपपूजादिका क्रियाः निःफलं तत्प्रिये तेषां शिलायामुप्तबीजवत् ग्रंथांतरे चिकी
र्षुर्देवतो यास्ति मा दौभाबिविचारयेत् स्नानसंध्यादिकं कृत्वा स्मृत्वाहरिपदांबुजं शापीतकुशशय्यायांज्ञा
र्थयेद्वृषभध्वजं ॐ भगवन्देवदेवेशाशूलभृद्वृषवाहन इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत १ नु
मोज्ञार्यंत्रिनेत्राय पिंगलाय महात्मने भीमाय विश्वमुख्याय स्वप्नाधिपतये नमः २ स्वप्ने कथय मे तथ्यं
सर्वं कार्यमशेषतः क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ३ एभिर्मंत्रैः शिवं प्रार्थ्य निद्रां कुर्या
न्निराकुलः स्वप्नदृष्टं निशि प्रातः गुरवे विनिवेदयेत् तमंतरेण मंत्रज्ञः स्वयं चैव विचारयेत् ॥ ॥ इति
पुरश्चरणदीपिकायां दीक्षाविधानाख्यो द्वितीयः प्रकाशः ॥ ॥ ॥ श्रीदक्षिणामूर्तिगुरुभ्यो नमः ॥ अ
थारिमंत्रत्यागविधिः अरिमंत्रो गृहीतश्चेद्दैवानवशतस्तदा तस्यत्यागस्तु कर्तव्ये स्तत्प्रकारो धुनोच्य
ते सुदिने स्थापयेत्कुंभं सर्वतोभद्रमंडले विलोमस्त्वं जपन्मंत्रं पूरयेत्तं सुपायसा तत्र देवं समावाह्य राम
यजेदावरणान्वितं तदग्रे स्थंडिलं कृत्वा प्रतिष्ठाप्यानलं ततः जुहुयान्मूलमंत्रेण विलोमेन शतं घृ ४
तैः दिक्पतिभ्यो बलिं दद्यात्पायसान्नैर्घृतान्वितैः पुनः संपूज्य देवेशं प्रार्थयेनानुनासुना ॐ आनुकू

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.


कृत्यमनासोच्यमयातरलबुद्धिना यदुपात्तंपूजितंचप्रभोमंत्रस्वरूपकं तेनमेमनसःक्षोभमशेषंविनिवर्तय
पापंप्रतिहतंचास्तुभूयाच्छ्रेयःसनातनं तनोतुममकल्याणपावनीभक्तिरस्तुमे एवंसंप्रार्थ्यदेवेशंकर्पूरागरु
चंदनैः विलोमंविलिखेन्मंत्रंतालपत्रेतमर्चयेत् प्रवंप्यतंनिजेमूर्ध्निस्नायात्कुंभस्थितैर्जलैः पुनःसंपूर्यसं
तोयैःनपश्चन्मंत्रयंत्रकं सपूज्यकुंभंसरितितडागेवापिनिक्षिपेत् विप्रान्संभोज्यमुच्येतपीडयासौमनू
त्थये त्परिमंत्रत्यागविधिः मंत्रसंग्रहे लघुदोषेषुसर्वत्रमायांकाममथापिवा क्षिप्त्वात्वादौश्रियंदद्या
त्सर्वदोषविमुक्तये प्रणवोभुवनेशानीरमाबीजंमनोभवं जीवनंसर्वमंत्राणामित्याहभगवान्शिवः लु
प्तबीजाश्चयेमंत्रागोपालस्यक्वचित्क्वचित् कामबीजंमुखेतेषांदद्यात्सर्वार्थसिद्धये श्रीबीजाद्यंयदा
जप्यात्तदालक्ष्मीरचंचला कामाद्यंजपनादेवसर्वलोकंवशंनयेत् वागादिजपनात्तत्वाक्सिद्धि
र्जायतेचिरात् शक्तिबीजादिकोमंत्रोनिर्वाणमचिराद्दिशेत् पुरनात्प्रणवाभ्यांतुमोक्षमाप्नोतिनि
श्चितं एवंमंत्रवरंजप्त्वाकिंनसाध्यतिमंत्रविदिति मालिनीविजयेच एकाक्षरेतथाकूटेत्र्यक्षरेमंत्र
नामके स्त्रीदत्तेस्वप्नलब्धेचसिद्धादीन्नैवशोधयेत् मंत्रसिद्धोपदेशेषुचतुराम्नायजेषुच मायामंत्रे

स्वप्नियेचसिद्धादीन्नैवशोधयेत् एकद्वित्र्यादिवीजस्यसिद्धादीन्नैवशोधयेत् इतिसिद्धादिविचारः
अथोवैदशसंस्काराः मंत्राणांप्रोच्यतेमया कर्मण्यतिजडामंत्रा मंत्रिणांयोजिताअपि तस्मात्तद्दोषना
शायकर्तव्याःसंस्क्रियादश तथाचशारदातिलके मंत्राणांदशसंस्काराः कथ्यंतेसिद्धिदायिनः जन
नंजीवनंपश्चात्ताडनंबोधनंतथा अथाभिषेकोविमलीकरणाप्यायनेपुनः तर्पणंदीपनंगुप्तिःश्चैता
स्तुमंत्रसंस्क्रियाः अथदशसंस्कारसंकल्पः अमुकस्यजप्तव्यामुकमंत्रजपजन्यफलानुकूलमंत्र
निष्ठसंस्कारप्राप्तिकामस्तस्यमंत्रस्यजननादिदशसंस्कारान्करिष्यामीतिसंकल्पः प्रत्येकमेवसं
कल्पइतिवदंति तेषांस्वरूपं मंत्राणांमातृकामध्यातुद्धारोजननंस्मृतं १ प्रणवांतरितान्कृत्वामंत्र
वर्णाञ्जपेत्सुधीः एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः २ मंत्रवर्णान्समालिख्यताडयेच्चंदनांभसा
प्रत्येकंवायुनामंत्रीताडनंतदुदाहृतं ३ विलिख्यमंत्रंतन्मंत्रीप्रसूनैःकरवीरजैः तन्मंत्राक्षरसंख्यातै
र्हन्याद्यांतेनबोधनं ४ स्वतंत्रोक्तविधानेनमंत्रामंत्रार्णसंख्यया अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशु
द्धये ५ संचिंत्यमनसामंत्रंज्योतिर्मंत्रेणनिर्दहेत् मंत्रेमलत्रयंमंत्रीविमलीकरणंत्विदं तारंव्योम

ग्निमनुयुक्तं दंडी ज्योतिर्मनुर्मतः ६ कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः तेन मंत्रेण विधिवद्धेतदा
प्यायनं मतं ७ मंत्रेण वारिणा मंत्रे तर्पणं तर्पणं स्मृतं तारमायारमायोगो मनोर्दीपनमुच्यते ८ जप्य
मानस्य मंत्रस्य गोपनं त्वप्रकाशनं संस्कारा दश संप्रोक्ताः सर्वतंत्रेषु गोपिताः ९ यान्कृत्वा संप्रदायेन मं
त्री वांछितमश्नुते एवं दश संस्कारान्कृत्वा मूलमंत्रं तांबूलपत्रे भूर्जपत्रे वा लिखित्वा कंठे वा दक्षिणहस्ते वा
धारयेदिति दश संस्काराः मंत्रस्य ॥ॐ॥ इति पुरश्चरणदीपिकायां अरिमंत्रत्यागादि विधानाख्यस्तृती
यः प्रकाशः ३॥ॐ॥ ॥अथ जपस्थानानि नारदीये शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि दीप
स्य ज्वलितस्यापि जपकर्म प्रशस्यते गृहे जपं समं विद्यात् गोष्ठे शतगुणं भवेत् नद्यां शतसहस्रं स्यादनंतं शि
वसन्निधौ समुद्रतीरे च ह्रदे गिरौ देवालयेषु च पुण्याश्रमेषु सर्वेषु जपं कोटिगुणं भवेत् तत्पूर्वाभिमुखो
वश्यो दक्षिणे चाभिचारिकं पश्चिमे धनदं विद्यादुत्तरे शांतिदं भवेत् अन्यच्च अग्रे पृष्ठे तथा वामे समीपे ग
र्भमंदिरे जपं प्रदक्षिणं होमं न कुर्याद्धि शिवालये इति जपस्थानानि इत्यादिस्थानमाश्रित्य दीपस्थानं
विचिंतयेत् कूर्मस्यैव मुखं विद्धि दीपस्थानं सुसिद्धिदे तद्यथा चतुरस्रं भुवं भित्वा कोष्ठानां नवकं लि

पु॰दी॰ ६

खेत् पूर्वकोष्ठादिविलिखेत्सप्तवर्गाननुक्रमात् लक्षावीशेमध्यकोष्ठेस्वरान्युग्मक्रमाल्लिखेत् दिक्षुपूर्वो
द्वितीयच्चग्रामस्याद्यक्षरं भवेत् मुखंतदास्यजानीया हस्तावुभयतः
स्थितौ कोष्ठेकुक्षीउभेपादौद्वौशिष्टंपुछमीरितं कूर्मचक्रमिदंप्रोक्तं
मंत्राणांसिद्धिसाधनं मुखस्थोलभतेसिद्धिंकरस्थस्वल्पभोगभाक् कु
क्षिस्थितउदासीनःपादस्थोदुःखमाप्नुयात् पुछस्थंपीडितोमंत्रीबंधनो
च्चाटनादिभिः दीपस्यानंततःक्षेत्रेकृत्वामंत्रीशुचिर्जपेत् क्षेत्रसाध
कमंत्राणांएकमेवाद्यमक्षरं यदिस्यात्सध्रुवंमंत्रःक्षिप्रमेवप्रसिध्यती
तिश्रीविद्यारण्यचरणाः ग्रंथांतरे युग्मंस्वराणांविलिखेत्पूर्वकादींश्चव
र्गान्क्रमशःक्षमीशे स्थानाधिपस्याक्षरमस्तियत्रतंदीपदंशंमुनयोवदंति
देवीयामले कुरुक्षेत्रेप्रयागेच्चगंगासागरसंगमे महाकालेचकाश्यांच
कूर्मस्थानंनचिंतयेदिति विश्वामित्रकल्पे काशीपुरीचकेदारोमहाकालोथनासिकं त्र्यंबकंचमहाक्षेत्रं




राम ६

पंचदीपाइमेभुवि एतेषुसर्वतोदीपाःकूर्मासनमितस्ततः इतिदीपचक्रं अथासनविचारः वंशाश्मधर
णीदारुतृणपल्लवनिर्मितं वर्जयेदासनंधीमान्दारिद्र्यव्याधिदुःखदं तूलकंबलवस्त्राणिपट्टव्याघ्रमृगाजि
नं कल्पयेदासनंधीमान्सौभाग्यज्ञानसिद्धिदम् वंशासनेदरिद्रत्वंपाषाणेव्याधिसंभवः धरण्यां स्याद्दुः
खभूतिर्दौर्भाग्यंदारुकासने तुलकेचयशोहानिः पल्लवेचित्तविभ्रमः कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीव्याघ्र
चर्मणि स्यात्पौष्टिकंच कौशेयंशांतिकंवेत्रविष्टरं वंशासनेव्याधिनाशःकंबलेदुःखमोचनं स्याद्भिचार
कंनीलेरक्तेवश्यादिकंभवेत् धवलेशांतिकंमोक्षःसर्वार्थश्चित्रकंबले सर्वाभावेत्वासनार्थंकुशविष्टर
मिष्यते इत्यासनानि अथजपमाला मंत्रखंडे स्फाटिकींमौक्तिकींवापिप्रोतव्यासितसूत्रकैः सर्वकर्मस
मृध्यर्थंजपेद्रुद्राक्षमालया धर्मार्थकाममोक्षार्थंजपेत्पद्माक्षमालया अरिष्टपुत्रजीवैश्चशंखपद्मोम
णिस्तथा कुशग्रंथिश्चरुद्राक्ष उत्तमंचोत्तरोत्तरं अन्यत्रापि रुद्राक्षंश्वेतपद्माक्षमालेतु अखिलेजपेत्
अतिस्थूलोतिसूक्ष्मश्चस्फुटितोभंगुरिर्लघुः भिन्नःपुराधृतोजीर्णोरुद्राक्षोनवरस्मृतः करमालाउक्तंच
अलाभेजपमालायाःकरशाखासुपर्वभिः अनामिकायायोमध्यस्तस्माद्धःक्रमेणतु मध्यांगुल्यग्रपर्वा

पु०दी० स्वप्ने येच सिद्धादीन्नैवशोधयेत् एकद्वित्र्यादिबीजस्यसिद्धादीन्नैवशोधयेत् इतिसिद्धादिविचारः
५ अथोवैदशसंस्काराः मंत्राणांप्रोच्यतेमया कर्मण्यतिजडामंत्रा मंत्रिणा योजिताअपि तस्मात्तद्दोषना
शायकर्तव्याःसंस्क्रियादश तथाचशारदातिलके मंत्राणांदशसंस्काराः कथ्यंतेसिद्धिदायिनः जन
नंजीवनंपश्चात्ताडनंबोधनंतथा अथाभिषेकोविमलीकरणाप्यायनेपुनः तर्पणंदीपनंगुप्तिर्दशैता
स्युर्मंत्रसंस्क्रियाः अथदशसंस्कारसंकल्पः अमुकस्यजप्तव्यामुकमंत्र जपजन्यफलानुकूलमंत्र
निष्ठसंस्कारप्राप्तिकामस्तस्य मंत्रस्य जननादिदशसंस्कारान्करिष्यामीतिसंकल्पः प्रत्येकमेवसं
कल्पइतिवदंति तेषांस्वरूपं मंत्राणांमातृकामध्यात्‌उद्धारोजननंस्मृतं १ प्रणवांतरितान्कृत्वा मंत्र
वर्णाञ्जपेत्सुधीः एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः २ मंत्रवर्णान्समालिख्यताडयेच्चंदनांभसा
प्रत्येकंवायुनामंत्रीताडनंतदुदाहृतं ३ विलिख्य मंत्रंतन्मंत्री प्रसूनैःकरवीरजैः तन्मंत्राक्षरसंख्यातै रा०म
र्हन्याद्यांतेनबोधनं ४ स्वतंत्रोक्तविधानेन मंत्रामंत्रार्णसंख्यया अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशु ५
द्धये ५ संचिंत्यमनसामंत्रंज्योतिर्मंत्रेणनिर्दहेत् मंत्रेमलत्रयंमंत्री विमलीकरणंत्विदं तारंव्योम

ग्निमन्तुयुक्तं दंडी ज्योतिर्मन्तुर्मतः ६ कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः तेन मंत्रेण विधिवद्वैतदा
प्यायनं मतं ७ मंत्रेण वारिणा मंत्रे तर्पणं तर्पणं स्मृतं तारमायारमायोगो मनोर्दीपनमुच्यते ८ जप्य
मानस्य मंत्रस्य गोपनं त्वप्रकाशनं संस्कारा दश ते प्रोक्ताः सर्वतंत्रेषु गोपिताः ९ यान्कृत्वा संप्रदायेन मं
त्री वांछितमश्नुते एवं दशसंस्कारान्कृत्वा मूलमंत्रं ताम्रपत्रे भूर्जपत्रे वा लिखित्वा कंठे वा दक्षिणहस्ते वा
धारयेदिति दशसंस्काराः मंत्रस्य ॥ ॥ इति पुरश्चरणदीपिकायां अरिमंत्रत्यागादि विधानाख्य स्त्रितीय
सः प्रकाशः ३ ॥ ॥ ॥ अथ जपस्थानानि नारदीये शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि दीप
स्य ज्वलितस्यापि जपकर्म प्रशस्यते गृहे जपं समं विद्यात् गोष्ठे शतगुणं भवेत् नद्यां शतसहस्रं स्यादनंतं शि
वसन्निधौ समुद्रतीरे च ह्रदे गिरौ देवालयेषु च पुण्याश्रमेषु सर्वेषु जपं कोटिगुणं भवेत् तत्पूर्वाभिमुखो
वश्यो दक्षिणे चाभिचारिकं पश्चिमे धनदं विद्यादुत्तरे शांतिदं भवेत् अन्यच्च अग्रे पृष्ठे तथा वामे समीपे ग
र्भमंदिरे जपं प्रदक्षिणं होमं न कुर्यादिति शिवालये इति जपस्थानानि इत्यादिस्थानमाश्रित्य दीपस्थानं
विचिंतयेत् कूर्मस्यैव मुखं विद्धि दीपस्थानं सुसिद्धिदे तद्यथा चतुरस्रं भुवं भित्वा कोष्ठानां नवकं लि

णतु मंत्रयेत्पंचमेनैव प्रत्येकं तु शतंशतं मेरुंचपंचमेनैव तथामंत्रेण मंत्रयेत् येनप्रतिष्ठिता माला तमे
वतु मंत्रं जपेत् अन्य मंत्रजपाद्धि ह्नानू नकार्या कर्हिचिद्बुधैरिति प्रकारांतरे ईश्वरउ० प्रक्षाल्यपंचग
व्येनतथापंचामृतेनच संस्नाप्य पंचगव्येनशिवकुंभस्थितेनच सर्वैर्वैमूलमंत्रेण गंध पुष्पाक्षता
दिभिः धूपदीपनैवेद्यादि दत्वाचाष्टशतंस्पृशेत् मूलमंत्रं जपेत्पश्चाद् उवत्रेण मेहुभः एवंयासंस्कृ
तामाला जपकर्मणिसर्वदा अभीष्टफलदात्यर्थं सा सर्वबाधविनाशिनी मध्यमानामिकांगुष्ठैरक्षमाला
मणीशतैः एवंजपस्य चैकस्यं क्रमोयंचालये ज्जपेत् अंगुष्ठेन तु मोक्षाय मध्यमाद्युर्विवृद्धये जपेद
नामिकांगुष्ठैर्नैतराभ्यां कदाचनेति ग्रंथांतरे तु अंगुष्ठमध्यमा योगात् सर्वसिद्धिप्रदामतेति इत्य
क्षमाला अथ भक्षाभक्ष्यविचारः गोतमीये चरुर्मूलफलंक्षीर दधिभिक्षान्नसक्तवः शाकश्चाष्ट
विधंचान्नंसाधकस्योच्यतेबुधैः नारदीये मृदुकोष्ठं सुपक्वंचकुर्याद्वैलघुभोजनं नेंद्रियाणां विका
रःस्यात्तथा भुंजीतसाधकः यद्वातद्वापरित्याज्यं दुष्टान्नं कुत्सितं फलं प्रशस्तान्नं समश्नीयान्मंत्रसिद्धि
समीहया पयोव्रतेतु विशेषः पयोव्रतस्यसिद्धिःस्यात् लक्षेनैव न संशयः शाकभैक्ष्यहविष्याशीक

लोलक्षत्रयं जपेत् भिक्षान्नं तु न गृहिणः यतिश्च ब्रह्मचारी च भिक्षान्नजीविनावुभौ सर्वधर्मबहिर्भूतो गृही भि
क्षान्नजीवनात् विधवाविधुरश्चापि स्नातकश्च परित्यजेत् इति भक्ष्याभक्ष्यम् अथ नियमः लवणं पललं चै 6
व क्षारं क्षौद्रं रसांतरं माषमुद्गमसुराद्याः कोद्रवांश्चणकानपि असद्भाषणमन्याय्यं वर्जयेदन्यपूजनं विना
श्रमोचितं किंचित् नित्यं नैमित्तिकं चरेत् स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् असत्यभाषणं चैव
कौटिल्यं च परित्यजेत् सद्भिरपि न भाषेत जपहोमार्चनादिषु वाग्यतः कर्म निर्वर्त्य निस्पृहो वर्तितादिषु वर्ज
येत् गीतकाव्यादिश्रवणं नृत्यदर्शनम् परान्नं च परद्रव्यं तथैव तु प्रतिग्रहः परस्त्रीपरनिंदां च मनसापि वि
वर्जयेत् जिह्वादग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने तांबूलं गं
धलेपं च पुष्पधारणमेव च मैथुनं तत्कथालापं तद्गोष्ठीं च विवर्जयेत् कौटिल्यं क्षौद्रमभ्यंगं अनिवेदितभो
जनं असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकम् स्नायाच्च पंचगव्येन केवलामलकेन वा श्रुतिस्मृति
पुराणोक्तैर्मंत्रैः स्नायान्निरंतरं स्नानं त्रिषवणं प्रोक्तं अशक्तौ द्विः सकृत्तथा अस्नातस्य फलं नास्ति न चा
तर्पयतः पितॄन् स्वजप्यमंत्रेण तु कुंभमुद्धृत्य निमज्जनं स्यात् अनुपदं स्वमस्तके सदाष्टविंशत्यभिषेकमाच

पु॰दी॰ रेत् तथाष्टजप्याचमनं च संततमिति ॥ ॥ इति पुरश्चरणदीपिकायां जपस्थानादिनियमास्यश्चतुर्थः प्रकाशः
९ ॥ ॥ ॥श्रीदक्षिणामूर्तिगुरुभ्यो नमः अथ जपविधानं तत्र शुभे दिने नदीपर्वतमस्तकादौ क्षेत्रं परिक
ल्प्य क्षेत्रपालपूजां विधाय पूर्वोक्तदीपस्थानमाश्रित्य जपमारभेत् तथा कौर्मे अद्रव्यपर्वताः पुण्या नदीती
राणि यानि च सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः ततो न्यत्र सुग्रहं कुर्यादिति तदुक्तं ग्रंथांतरे
एवं पूर्वसमीरितेन विधिना शक्त्या स्वयं सादरं संपाद्याखिलसाधनानि विधिवत् श्रीसद्गुरोराज्ञया नशनैर्न
त्वतिस्पृष्टं न द्रुतं न विलंबितं न न्यूनं नातिरिक्तं जपं कुर्याद्दिने दिने जातः स्वस्थ इतस्ततस्तु विहिते स्वस्था
सने भूत्वहं कुर्यान्मंत्रमुदीरयन्निति महानुष्ठाने तोर्वंशी गृहीतस्यास्य मंत्रस्य पुरश्चरणसिद्ध्यै मयेयं
गृह्यते भूमिर्मंत्रोयं सिध्यतामिति मंत्रेण ततो [illegible]तपापक्षयार्थं सहस्रपंचकं त्रयं वाष्टोत्तरसहस्रं वा
गायत्रीं जपित्वा ब्राह्मणानुभोजनादिनाभ्यर्च्य गुरुं च वस्त्रालंकारादिभिस्ततो हविष्यान्नं नैवेद्यभोजनं राम
कुर्यात् कस्यचिन्मते उपवासः उक्तं च सनत्कुमारकल्पे विप्रान्संतर्पयेदन्नं भोजनाच्छादनादिभिः ९
बहुभिर्वस्त्रभूषाभिः प्रणमेद्गुरुमात्मनः आरभेत जपं पश्चात्तद्दत्ताज्ञापुरःसरमिति पूर्वदिनकृत्यं ततो

जपारंभदिने स्नानादिकं विधाय दीपस्थाने मत्वासनविधिं च संपाद्य संकल्पं कुर्यात् तद्यथा अद्येत्यादि
पंचांगं स्मृत्वामुकाक्षरामुकमंत्रस्य सिद्धिकामोमुकसंख्याकजपतद्दशांशहोमतर्पणाभिषेक· विप्रभो
जनात्मकपुरश्चरणमहं करिष्ये ब्राह्मणद्वारा वा करिष्ये इति संकल्प्य गणेशपूजनं कृत्वामुकऋषिरमु
कछंदोमुकदेवता पुरश्चरणजपे विनियोगः इत्युक्त्वा ऋष्यादिन्यासान्ध्यानं च कृत्वा ॐ त्वं माले सर्व
देवानां सर्वसिद्धिप्रदा मता तेन सत्येन मे सिद्धिं मातर्देहि नमोस्तु ते इति जपमालां प्रार्थ्य हस्ते कृत्वा दे
वोहमिति भावयित्वा जपमारंभेदिति पुरश्चरणजपे दिवसातिक्रमो न कर्तव्यः जपस्तु प्रत्यहं न न्यूनो
नाधिकः न त्वरया न च विलंबेन यत्किं तु मध्यमवत्या कार्यः उक्तं च नारदीये नैरंतर्यविधिः प्रोक्तो नहि
नोव्यतिलंघयेत् दिवसातिक्रमे तेषां सिद्धिरोधः प्रजायते मध्याह्नावधिश्च उक्तं च चित्रांडिकायां शिवार्ची
श्वशुरुं नत्वा जपं कुर्यात्समाहितः उक्तसंख्यामितं प्रातःकालान्मध्यंदिनावधि मानसः सिद्धिकामानां उ राम
ष्टिकामे रुपांशुकः वाचिको मारणे चैव प्रशस्तो जप ईरितः शयनं दर्भशय्यायां शुचिः प्रयतमानसः नैक
वासा जपेन्मंत्रं बहुवस्त्राकुलो न च गोभिलोपि नार्द्रवासा जपं कुर्याद्धोमं दानं प्रतिग्रहं सर्वं तद्राक्षसं

पु० दी० विद्याद्वहिर्ज्जानुचयत्कृतं अशुचिर्दर्शनेउ के स्वयमप्यशुचिः पुनः आचांतः प्रयतो भूत्वा न्यासं
१० पूर्ववदाचरेत् मौनेन जपं कुर्यात् तदुक्तं मणिसागरे संध्ययोरुभयो जप्ये भोजने दंतधावने पितृका
र्ये च दैवे च तथा मूत्रपुरीषयोः गुरूणां सान्निधौ दाने योगे चैव विशेषतः एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मा
नवः मौनं नोपचरेत्तद्या यश्चित्तं तदुक्तं यथांतरे सकृदुच्चारिते शब्दे प्रणवं समुदीरयेत् अन्यच्च ज
पध्यानसमायुक्तो मंत्री सिद्ध्यति नान्यथेति अथ पुरश्चरणस्वरूपमुच्यते पूजा त्रैकालिकी नित्यं जप
स्तर्पणमेव च होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते कुलार्णवे पंचांगानि महादेवि जपो होमश्च तर्पणं
स्वाभिषेकश्च विप्राणामाराधनमपीश्वरी पूर्वपूर्वदशांशेन पुरश्चरणमुच्यते स्कांदे पूजया विपुलं राज्यं
अग्नौ होमेन संपदः जपेन पापसंशुद्धिर्ध्यानेन तन्मयमुच्यते वसिष्ठसंहितायां इषुमात्रं स्थंडिलं वा संक्षि
प्ते होमकर्मणि पिंगलामते होमे प्रशस्यते कुंडं स्थंडिलं वा हुसंमितमिति वायवीयसंहितायां कुंडे वा राम
स्थंडिले वापि कुंडे होमः प्रशस्यते होमोक्तविधिनाचैव कुर्याद्वै साधकोत्तमः कुंडं तु नारदेनोक्तं हस्त १०
मात्रं शुभं मतं अथ होमकालः वसंते चैव पूर्वाह्णे मध्याह्ने ग्रीष्म उच्यते अपराह्णे भवेद्वर्षा शरच्चैवार्द्धे

रात्रिके उषोहेमंतकश्चैव संध्यायां शैशिरःस्मृतः ग्रीष्मेउच्चाटनं कुर्यात्स्तंभनं प्रावृषेतथा शारदि शांतिकं कु
र्याद्धेमंते मोहनं कुरु शैशिरे मारणं ज्ञेयं वसंते वश्यकर्मणि अथ वह्निस्वरूपं बधिरत्वं कर्णहोमे नेत्रेत्वं
धत्वमाप्नुयात् नासिकायां मनःपीडा शिरोहोमो हि मृत्युदः यतः काष्टं ततः श्रोत्रं यतो धूमोथ नासिका
यतोल्पज्वलनं नेत्रं यतो भस्मस्ततः शिरः यतः प्रज्वलितो वह्निस्तन्मुखं जातवेदसः स्वर्णसिंदूरबालार्ककुं
कुमक्षोदसन्निभः वह्निवर्णःशुभावहः इति भेरीवारिदहस्तीनां ध्वनिर्वह्नेःशुभावहः नागचंपकपुन्ना
गपाटलायूथिलानभः गंधोवह्नेःशुभावहः काकस्वरस्वरो वह्नेर्यजमानस्य दुःखदः कृष्टेकष्टगते वर्णे
यजमानं विनाशयेत् एवं दुष्टेषु चिन्हेषु प्रायश्चित्तं समाचरेत् मूलेनाज्येन जुहुयात् पंचविंशतिराहुतीः
इति वह्निस्वरूपं अथ होमद्रव्याणि प्रणवकल्पेभाषितंलैंगउपपुराणे पालाशपुष्पहोमेन सर्वज्ञत्वम
वाप्नुयात् अश्वत्थस्य समिद्धोमात्ब्राह्मण्यं सुस्थिरं भवेत् दूर्वाहोमादवाप्नोति दीर्घायुष्यं नसंशयः भ
न्नाज्यहोमादाप्नोति मुनेराज्यं द्विजोत्तमः कन्याकामो लभेत्कन्यां लाजाहोमेन सुव्रत वैराग्यकामो वै
राग्यं लभते घृतहोमतः श्रियार्थी श्रियमाप्नोति बिल्वपत्रस्य होमतः पुत्रकामो लभेत्पुत्रं जीवपुत्रस्य हो

मतः जीवसुत्रबीजविशेषः आरोग्यकाम आरोग्यं लभतेतिलहोमतः यद्यदिच्छतितत्सर्वं लभतेपुष्पहो
मतः अन्यच्च येषांजपेचहोमेचसंख्यानोक्तामहर्षिभिः तेषामष्टसहस्राणिसंख्योक्ताजपहोमयोः अ
र्णवे कल्पोक्ताचकृतेसंख्यात्रेतायांद्विगुणास्मृता द्वापरेत्रिगुणाप्रोक्ताकलौसंख्याचतुर्गुणा सनत्
कुमारेणच स्वाहांतेनैवमंत्रेणहोमःकार्योविजानतः सन्यासिनांनहोमोस्तिनवाब्राह्मणतर्पणं जप
मात्रेणसिद्धिःस्यात्तर्पणाद्यं विकल्पितं इति तथाचगौतमीये होमकर्मण्यशक्तानांविप्राणांद्विगुणो
जपः इतरेषांतुवर्णानांत्रिगुणादिर्विधीयते अथहोममुद्रा होमेमुद्रास्मृतास्तिस्रोमृगीहंसीचसूकरी
शांतिकेचमृगीज्ञेयाहंसीपौष्टिककर्मणि सूकरीत्वभिचारेषुकार्यातंत्रविदुत्तमैः सूकरीकरसंकोचीहं
सीमुक्तकनिष्ठिका मुक्तकनिष्ठतर्जन्यामृगीमुद्राप्रकीर्तिता अभिचारादिहोमेषुसूकरीकथिताबुधैः
सूकरीपुत्रकामायधनकामायहंसिनी मृगीमोक्षेप्रकर्तव्या आहुतिःसर्वकामिका हुतंयन्मुद्रयाहीनं
तत्सर्वंनिःफलंभवेत् कश्चित्तुप्रत्यहंजपदशांशातर्पणमार्जनेकरोति कश्चित्लक्षेपूर्णे द्वावपिप्र
क्षोसांप्रदायिकौ उक्तंचनारदीये स्वजपस्यदशांशेनहोमंकुर्यात्दिनेदिने अथवालक्षपर्यंतेहोमः

| पृष्ठ | पंक्ति | अशुद्धं | शुद्धम् | पृष्ठ | पंक्ति | अशुद्धं | शुद्धम् |
|---|---|---|---|---|---|---|---|
| ८ | ८ | दशा | देशे | १० | ६ | मारं | मार |
| ८ | १७ | कस्यं | कस्य | १० | ७ | बेनय | बेन |
| ८ | १८ | तेतिइ | ते | १० | ७ | बत्या | वृत्या |
| ८ | १९ | फलं | फल | १० | १८ | श्वरी | श्वरि |
| ९ | ९ | मसु | मसू | १० | २२ | तेःचै | तश्चै |
| ९ | ११ | द्याति | द्यानि | ११ | २ | रण | रणं |
| ९ | ३ | पर्वता | पर्वतः | ११ | ४ | स्ततः | ततः |
| १० | १ | मत्वा | गत्वा | ११ | ६ | लान | कानि |
| १० | २ | स्मृत्या | स्मृत्वा | १२ | ७ | जप | जपं |
| १० | २ | तद्द | तत्तद्द | १२ | १४ | तवा | तंवा |
| १० | ५ | रणे | रण | १२ | १८ | गुरुंय | गुरुंध्यात्वा ततोय |

॥इतिपुरश्चरणदीपिकाचाशुद्धाशुद्धीपत्रंसमाप्तं॥

॥स्वीयबुध्यनुसारेणपुरश्चरणदीपिका॥बनारसीप्रसादस्यनियोगेनतुशोधिता॥१॥ ॥ ॥ ॥



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥ अथपुरश्चरणदीपिकायाःशुद्धाशुद्धपत्रमिदं ॥

| पृष्ठ | पंक्ति | अशुद्धं | शुद्धं | पृष्ठ | पंक्ति | अशुद्धं | शुद्धम् | पृष्ठ | पंक्ति | अशुद्धं | शुद्धम् | पृष्ठ | पंक्ति | अशुद्धं | शुद्धम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | ४ | नहे | नर्हे | ३ | १२ | तुहु | तूदृ | ४ | ९ | शिष्य | शिष्यः | ५ | १२ | स्वप्नि | स्वप्नि |
| १ | ७ | कुर्णर्ले | कुलार्ण | ३ | १६ | शिश्श | पोषं | ४ | १० | प्राप्त | प्राप्ती | ५ | १७ | निष्ट | निष्ठ |
| १ | ९ | विष्णुः | विष्णु | ३ | १८ | ये | यइति | ४ | १९ | दशान | दृज्ञान | ५ | २२ | घां | ह्वा |
| २ | ६ | क्षान् | क्षात् | ३ | १९ | कंचो | कंपो | ४ | २० | लोम | लोमं | ६ | ५ | स्थिती | स्तुती |
| २ | ७ | धान् | धातू | ३ | १९ | त्यूक्तांच | स्युक्तांश्च | ४ | २० | जपनू | जपनू | ६ | ७ | गोष्ठे | गाष्ठे |
| २ | ८ | द्धान्न | द्धान्ने | ४ | १ | चित | चितं | ४ | २१ | नत | नल | ६ | ९ | वस्यो | वश्यो |
| २ | ८ | श्चिन् | श्चित् | ४ | २ | त्रित | त्रितं | ५ | २२ | नुकू | नु | ६ | ११ | ड्डिदे | ड्डिदं |
| २ | ८ | येन | येत् | ४ | ३ | मोस्त्विस्य | मेस्त्वीस्यच | ५ | २ | कल्याण | कल्याणं | ७ | ५ | ष्ठरं | ष्टरं |
| ३ | ८ | कुले | कूले | ४ | ६ | इतिपं | अथपं | ५ | ४ | पश्यनू | पश्येनू | ७ | ५ | दृभि | दाभि |
| ३ | ८ | यर्यो | र्ययोः | ४ | ६ | इतिपं | अथपं | ५ | ४ | सपू | संपू | ८ | १ | स्वेपा | त्वेषा |
| ३ | ९ | तीष्ठे | तीष्टे | ४ | ७ | इतिस | अथस | ५ | २१ | देष्टे | दिष्टे | ८ | ६ | कप | कंप |

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कार्यो विपश्चितेति अनंतरं दशांशं तर्पणं मार्जनं च कुर्यात् तत्र वैशंपायनः तर्पणस्य दशांशेन नमोंतं मंत्रमु
च्चरन् अभिषिंचेत्स्वमूर्धानं जलैः कुंभाख्यमुद्रया॥ ॥ इति पुरश्चरणदीपिकायां जपविधानाख्यः पंचमः
प्रकाशः॥ ॥ ॥श्रीदक्षिणामूर्तिगुरुभ्यो नमः॥ अथ संक्षेपपुरश्चरणविधिः कृष्णाष्टमीसमारभ्य या
वत्कृष्णचतुर्दशी देवं ध्यात्वा जपेन्मंत्रं अयुतानां चतुष्टयं दशांशं होमयेत्तस्मात्तर्पयेदभिषेचयेत् ततः
सिद्धो भवेन्मंत्र श्चाब्रवीत्कुंभसंभवः तद्यथा पूर्वोक्तमासतिथ्यादौ अष्टम्यां स्नानादिकं कृत्वा जपस्थाने
आसनविधिं च कृत्वा संकल्पं कुर्यात् अद्येत्यादि अमुकाक्षरामुकमंत्रस्य सिद्धिकामो अयुतचतुष्टयसं
ख्याकजपतद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकात्मकपुरश्चरणमहं करिष्ये तत्राष्टम्यादिचतु
र्दशीपर्यंतं प्रतिदिनं पंचसहस्रं सप्तशतचतुर्दशसंख्याकं चतुर्दशस्थाने षोडशसंख्याकं जपमहं करि
ष्य इति संकल्प्य न्यासादिकं च कृत्वा जपं कुर्यात् जपांते होमादिकं च अथ वान्यप्रकारेण पुरश्चरणमुच्य
ते ग्रहणे र्कस्य चंद्रस्य शुचिः पूर्वमुपोषितः नद्यां समुद्रगामिन्यां नाभिमात्रांभसि स्थितः स्पर्शादिमुक्तिप
र्यंतं जपेन्मंत्रं समाहितः तावत्कालं जपित्वा तु होमादिकं समाचरेत् इति कुलप्रकाश तंत्रे उक्तं

पु०दी० पूर्वदिनेउपवासमेकभुक्तंवाकुर्यात् कुलार्णवे अन्नैश्चतुर्विधैर्देविपदार्थैःषड्रसान्वितैः संभोजितेषुवि
१२ प्रेषुसर्वंहिसफलंभवेत् सम्यक्सिद्धैकमंत्रस्यपंचांगोपासनेनचसर्वेमंत्राश्चसिध्यंतितत्प्रभावात्कुले
श्वरि गुरुंविनामंत्रजपेदोषश्रवणएवंचअर्णवे यदृच्छयाश्रुतंमंत्रंछद्मनापिबलेनवा प्रेतितंवाथगा
थादौयज्जपेत्तदनर्थकृत् पुस्तकेलिखितान्मंत्रानालोक्यप्रजपंतिये ब्रह्महत्यासमंतेषांपातकंपरि
कीर्तितं ग्रंथांतरे आवाह्यदेवतामेकांभजेद्यश्चान्यदेवतां द्वाभ्यांलभतेशापंमंत्रीचंचलमानसः अ
न्यच्च प्रवासीबहुभक्षीचप्रजल्पोहीनेन्द्रियःप्रह[illegible]नीचसंगाच्चलेलो ल्याच्चषड्भिर्मंत्रोनसिध्यति
अथवादेवतारूपंगुरुंयजेत् पुरश्चरणहीनोपिमंत्राःसिध्येन्नसंशयः श्रीभगवानपि संतुष्टोहिगुरुर्य
स्यतस्यतुष्टंजगत्त्रयं नास्यसाध्यंजगत्यत्रसुप्रसन्नेगुरौमुने एवंपुरश्चरणंकृत्वागुरुदेवतामभिवंद्यवि
त्तादिनाशुश्रूषयाविद्यांजपेत् एतत्कर्मपरिसमाप्तौकल्पोक्तान्ब्राह्मणान्भोजयित्वाअन्यानिप्रयो राम
जनानिसाधयेदिति॥ॐ॥ इतिश्रीमद्भट्टोपनामककाशीनाथेनविरचितापुरश्चरणदीपिकासमाप्ता॥ भ १२
काश्यांत्रिपुरभैरवीसन्निधौकाशीसंस्कृतमुद्रायन्त्रेऽङ्कितेयंपौषशुक्लत्रयोदश्यांसमाप्ताचेयम्॥ सम्वत् १९२४॥॥

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥ इतिपुरश्चरणदीपिकासमाप्ता ॥

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com